शिष्यत" इति नित्यक्लिन्नाम्नायेऽपि "सर्व्वत्रावच्छिताप्येषा कामिनीषु विशेषतः । प्रकाशते ततस्तासामतिवृत्तिं न कारयेदिति" अञ्जसा तत्त्वेन योगिनां हृदयाम्भोजे नृत्यन्तीत्यस्य तैरेव गुरूपदेशेन ज्ञायते इत्यर्थः । "दृश्या तैरेव सा देवी सदा देशकदेशितैरित्युक्तेः सर्वभूतानाम् आधारे मूलाधारचक्रे स्फुरन्ती अनेन स्थाननिर्देशः विद्युदाकृतिरित्यनेन ध्यानमुक्तं यदाहुः"तड़ित्कोटिप्रख्यां स्वरुचिजितकालानलरुचिमिति" अथ वानेन अनेकशब्दोत्पत्तिहेतुत्वेनानेकधा भवतीत्युक्तं शङ्खमध्ये य आवर्त्तः स यथा शङ्खमध्यमावृत्य तिष्ठति तद्वदियमपि देवीत्यर्थः । इदमवान्तरवाक्यं भिन्नमेव शङ्खेति कुण्डलीत्यनयोर्हेतुहेतुमद्भावेन योजना । कुण्डलीभूता कुण्डलाकारतां प्राप्ता ये सर्पा तथाभूता । केचन कुण्डलीति भिन्नं पदं वर्णयन्ति भूतानि सर्पास्च ते यथा कुटिलगतयस्तद्वदियमपीत्यर्थः इति तत्र कुण्डली परदेवतेत्यनेन पुनरुक्तिः । सर्व्वदेवमयीति देवव्याप्तिः दीव्यतीति देवी तेजोरूपेत्यर्थः अनेन तेजोव्याप्तिः । सर्वमन्त्रमयीति मन्त्रव्याप्तिः । शिवा शिवरूपेत्यर्थः यद्वा शिवा कल्याणरूपा । साक्षात् सर्वतत्त्वमयीति तत्त्वव्याप्तिः । सूक्ष्मा सूक्ष्मतरा विभुरिति विरोधः परिहारस्तु सूक्ष्मा स्वरूपतः सूक्ष्मतरा दुर्ज्ञाना यद्वा सूक्ष्मात् त्रसरेणोरपि सूक्ष्मतरा अणुतरा अनेना ण्वादिव्याप्तिर्दर्शिता तदुक्तं "बालाग्रस्य सहस्रधा विदलितस्यैकेन भागेन या सूक्ष्मत्वात् सदृशी त्रिलोकजननीति"विभुः इयत्तया ज्ञातुमशक्या । त्रिधामेति सूर्यसोमाग्निरूपा । यद्वा त्रिधामेति स्थानत्रयं पातालभूस्वर्गरूपा अनेन स्थानव्याप्तिर्दर्शिता द्विचत्वारिंशद्वर्णात्मा भूतलिपिमन्त्रमयी पञ्चाशद्वर्णरूपिणीति मातृकामयी" ।

तस्या ध्यानादिकमुक्तं प्रयोगसारे यथा

"मूलाधारे कुण्डलिनीं ध्यात्वा संपूजयेन्नरः । ध्यानं तस्याः प्रवक्ष्यामि येन योगी प्रजायते । प्रसुप्तभुजगाकारां स्वयम्भूलिङ्गसंस्थिताम् । विद्युत्कोटिप्रभां देवीं विचित्रवसनान्विताम् । शृङ्गारादिरसोल्लासां सर्व्वदा कारणप्रियाम् । एवं ध्यात्वा कुण्डलिनीं ततोयजेत् समाहितः । मनसा गन्धपुष्पाद्यैः संपूज्य वाग्भवं जपेत् । ततोवै तोषयेत्ताञ्च स्तवेनानेन साधकः । "रुद्रयामले" अथ प्रातः समुत्थाय पशुरुत्तमपण्डितः । गुरूणां चरणाम्भोजं मङ्गलं शीर्षपङ्कजे । विभाव्य पुनरेवं हि श्रीपदं भावयेद्धृदि । पूजयित्वा च विविधैरुपचारैर्नमेत् स्तवैः । त्रैलोक्यं तेजसा व्याप्तां मण्डलस्थां महोत्सवाम् । तड़ित्कोटिप्रभादीप्तिं चन्द्रकोटिसुशीतलाम् । सार्द्धत्रिवलयाकारां स्वयम्भूलिङ्गवेष्टिताम् । उत्थापयेन्महादेवीं महावक्त्रां मनोन्मनीम् । श्वासोच्छ्वासादुद्गच्छन्तीं द्वादशाङ्गुलरूपिणीम् । योगिनीं खेचरीं वायुरूपां मूलाम्बुजस्थिताम् । चतुर्व्वर्णस्वरूपां तां वकारादिकसान्तकाम् । कोटिकोटिसहस्रार्ककिरणोज्ज्वलमोहिनीम् । महासूक्ष्मपथप्रान्तरन्तरान्तरगामिनीम् । त्रैलोक्यरक्षितां वाक्यदेवतां शब्दरूपिणीम् । महाबुद्धिप्रदां देवीं सहस्रदलगामिनीम् । महासूक्ष्मपथे तेजोमयीं सत्युस्वरूपिणीम् । कालरूपां ब्रह्मरूपां सर्वत्र सर्वचिन्मयीम् । ध्यात्वा पुनःपुनः शीर्षे सुधाब्धौ विनिवेशिताम् । सुधापानं कारयित्वा पुनःस्थाने समानयेत् । समानयनकाले तु सुषुम्णामध्यमध्यके । अमृताभिप्लुतां कृत्वा पुनःस्थानेषु पूजयेत् । ऊर्द्ध्वोद्गमनकाले तु महातेजोमयीं स्मरेत् । प्रतिप्रयाणकाले तु सुधाधाराभिराप्लुताम् । कुलकुण्डलिनीं देवीं मृतानन्दविग्रहाम् । ध्यात्वा ध्यात्वा पुनर्ध्यात्वा सर्वसिद्धीश्वरोभवेत् । तस्मिन् स्थाने महादेवीं विभाव्य किरणोज्ज्वलाम् । अमृतानन्दमूर्त्तिं तां पूजयित्वा शुभां मुदा । मानसोच्चारवीजेन मायां वा कामवीजकम् । पञ्चाशद्वर्णमालाभिर्जप्त्वानुलोमतस्तथा । विलोमेन पुनर्जप्त्वेति"

**कुलक्क** पु० कु+लक्क—आप्तौ भावे घञ् । करताल्याम् हारा० ।

**कुलक्षया** स्त्री कुलस्य क्षयोयस्याः । १सूकशिम्ब्याम् शब्दचि० इत० । २कुलनाशे पु० । "कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम्" । "कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः" गीता ।

**कुलघ्न** त्रि० कुलं हन्ति हन—टक् । वंशघातके । "सङ्करो नरकायैव कुलघ्नानां कुलस्य च । पतन्ति पितरोह्येषां लुप्तपिण्डोदकक्रियाः । दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः । उत्साद्यन्ते जातिधर्म्माः कुलधर्म्माश्च शाश्वताः । उत्सन्नकुलधर्म्माणां मनुष्याणां जनार्द्दन ! । नरके नियतं वासोभवतीत्यनुशुश्रुम" गीता । तत्र यथोत्तरं कार्य्यमुक्तं तत्रैव "कुलक्षये प्रणश्यन्ति कुलधर्म्माः सनातनाः । धर्म्मे नष्टे कुलं कृत्स्नमधर्म्मोऽभिभवत्युत । अधर्म्माभिभवात् कृष्ण ! प्रदुष्यन्ति कुलस्त्रियः । स्त्रीषु दुष्टासु वार्ष्णेय ! जायते वर्णसङ्करः । सङ्करोनरकायैव कुलघ्नानां कुलस्य च" एतदुत्तरं कुलघ्नशब्दे दर्शितम्